Roll No. ..................

**931**

# कक्षा 9वीं वार्षिक परीक्षा, 2024-25

[512]

# SANSKRIT

# संस्कृत

[Total No. of Questions: 23] [Total No. of Printed Pages: 08]

[Time: 03 Hours] [Maximum Marks: 75]

*निर्देशाः –*

*(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।*

*(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।*

*(iii) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखनीयानि।*

प्र.1 उचित विकल्पं चित्वा लिखत – (1×6=6)

(क) 'रामः' इत्यस्मिन् पदे कः विभक्तिः अस्ति –

(i) द्वितीया (ii) प्रथमा

(iii) चतुर्थी (iv) सप्तमी

(ख) 'फलेन' इत्यस्मिन् पदे वचनम् अस्ति –

(i) द्विवचनम् (ii) बहुवचनम्

(iii) एकवचनम् (iv) अन्यवचनम्

(ग) 'बालकम्' इत्यस्मिन् पदे विभक्तिः अस्ति –

(i) प्रथमा (ii) द्वितीया

(iii) तृतीया (iv) चतुर्थी

(घ) 'नद्यः' इत्यस्मिन् पदे वचनम् अस्ति –

(i) एकवचनम् (ii) द्विवचनम्

(iii) बहुवचनम् (iv) अन्यवचनम्

(ङ.) अधोलिखितेषु अव्ययं अस्ति –

(i) अद्य (ii) लता

(iii) राम (iv) पिता

(च) 'तत्र देवालयः अस्ति' एतस्मिन् वाक्ये अव्ययम् अस्ति –

(i) देवः (ii) आलयः

(iii) तत्र (iv) देवालयः

प्र.2 कोष्ठकात् प्रदत्तैः शब्दैः उचितं शब्दं चित्वा रिक्तस्थानानि पूरयत – (1×6=६

(क) 'लिख्' धातोः लट्लकारस्य प्रथम पुरुषस्य एकवचने.......................रूपं भविष्यति। (लिखेतः / लिखति)

(ख) 'पठामि' इत्यस्मिन् पदे.......................पुरुषः अस्ति। (मध्यम / उत्तम)

(ग) 'गच्छति' इत्यस्मिन् पदे.......................धातुः अस्ति। (गम् / गृत्र:)

(घ) 'भू' धातोः लृट्लकारस्य उदाहरणं.......................अस्ति। (अभवत् / भविष्यति)

(ङ.) 'अधिकारः' इति पदे.......................उपसर्गः अस्ति। (अधि / अधिक)

(च) 'प्रति' उपसर्गस्य उदाहरणं.......................अस्ति। (पूजनीयः / प्रतिदिनम)

प्र.3 युग्ममेलनं कुरुत – (1×6=६

| | |
|---|---|
| (क) पुस्तकालयः | (i) व्यञ्जनसन्धिः |
| (ख) सज्जनः | (ii) विसर्गसन्धिः |
| (ग) मनोहरः | (iii) द्विगु समासः |
| (घ) यथाशक्तिः | (iv) द्वन्द्व समासः |
| (ङ.) पञ्चवटी | (v) अव्ययीभावः समासः |
| (च) रामलक्ष्मणौ | (vi) दीर्घस्वरसन्धिः |

प्र.4 एकपदेन उत्तरं लिखत – (1X6=6)

(क) 'गत्वा' इत्यस्मिन् पदे कः प्रत्ययः अस्ति?

(ख) 'आगत्य' इत्यस्मिन् पदे कः प्रत्ययः अस्ति?

(ग) 'हसितुम्' इत्यस्मिन् पदे कः प्रत्ययः अस्ति?

(घ) कविः कां वादयितुं वाणीं प्रार्थयति?

(ङ.) माता काम् आदिशत्?

(च) मानवः कुत्र सुरक्षितः तिष्ठति?

प्र.5 शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत – (1X6=6)

(क) 'निर्धना दुहिता' इत्यस्मिन् वाक्ये विशेषणपदं 'निर्धना' अस्ति।

(ख) 'नद्यः आस्वाद्यतोयाः' इत्यस्मिन् वाक्ये 'नद्यः' विशेष्य पदं न अस्ति।

(ग) 'आम्रम्' इत्यस्य पदस्य 'रसालम्' पर्यायः भवति।

(घ) 'अधः' इत्यस्य पदस्य 'ऊर्ध्वः' पर्यायः न भवति।

(ङ.) 'हसन्ती' इत्यस्य पदस्य 'विलपन्ती' विलोमशब्दः अस्ति।

(च) 'वृद्धः' इत्यस्य पदस्य 'युवा' विलोमशब्दः नास्ति।

प्र.6 जन्तवः केन तुष्यन्ति? (2)

**अथवा**

यत्नेन किं रक्षेत् वित्तं वृत्तं वा?

प्र.7 अन्ते तपोदत्तः विद्याग्रहणाय कुत्र गतः? (2)

**अथवा**

तपोदत्तः पुरुषस्य कां चेष्टां दृष्ट्वा अहसत्?

प्र.8 "जटायो! पश्य" इति का वदति? (2)

**अथवा**

जटायुः केन वामबाहुं दंशति?

प्र.9 स्वार्थान्धः मानवः किं करोति? (2)

**अथवा**

प्रकृतेः प्रमुख तत्त्वानि कानि सन्ति?

प्र.10 आरुणेः मतानुसारं मनः कीदृशं भवति? (2)

**अथवा**

श्वेतकेतुः सर्वप्रथमम् आरुणिं कस्य स्वरूपस्य विषये पृच्छति?

प्र.11 रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – (कोऽपि द्वे) (1×2=2)

(क) तपोदत्तः तपश्चर्यया विद्यामवाप्तुं प्रवृत्तोऽस्ति।

(ख) गुरुगृहं गत्वा एव विद्याभ्यासः करणीयः।

(ग) नन्दिनी पादाभ्यां ताडयित्वा चन्दनं रक्तरञ्जितं करोति।

(घ) मोदकानि पूजानिमित्तानि रचितानि आसन्।

प्र.12 अधोलिखितानि वाक्यानि कः कं प्रति कथयति – (कोऽपि द्वे) (1×2=2)

(क) सूर्यातपे तण्डुलान् खगेभ्यो रक्ष।

(ख) अहं तुभ्यं तण्डुलमूल्यं दास्यामि।

(ग) धन्यवाद मातुल! याम्यधुना।

प्र.13 वाच्यपरिवर्तनं कुरुत – (कोऽपि द्वे) (1×2=2)

(क) छात्रः ग्रन्थं पठति। (कर्मवाच्ये)

(ख) सः फलं खादति। (कर्मवाच्ये)

(ग) रामेण गृहं गम्यते। (कर्तृवाच्ये)

प्र.14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् एकं सुभाषितं लिखत। (2)

प्र.15 अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीया – (कोऽपि द्वे) (1×2=2)

(क) श्री गणेशः नमः।

(ख) बालकः पठन्ति।

(ग) अहं पाठं पठति।

प्र.16 प्रदत्तैः शब्दैः उचितं शब्दं चित्वा रिक्तस्थानानि पूरयत – (कोऽपि चत्वारः) (½×4=2)

(सिंहात्, ग्रामात्, इच्छामि, वृक्षात्, आसीत्, भवति)

(क) जनः .................... बहिः आगच्छति।

(ख) बालकः .................. बिभेति।

(ग) .................. पत्राणि पतन्ति।

(घ) अहं किञ्चित् प्रष्टुम् ....................।

(ङ) मनः अन्नमयं ..................।

(च) श्वेतकेतुः आरुणेः शिष्यः ..................।

प्र.17 प्रदत्त वाक्यानि पाठ्याधारित घटना क्रमानुसारं लिखत (1/2×4=2)

(क) सा सखीभिः सह तीर्थयात्रायै काशीविश्वनाथमन्दिरं गच्छति।

(ख) उभौ नन्दिन्याः सर्वविधपरिचर्यां कुरुतः।

(ग) उमा मासान्ते उत्सवार्थं दुग्धस्य आवश्यकताविषये चन्दनं सूचयति।

(घ) मल्लिका पूजार्थं मोदकानि रचयति।

प्र.18 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (1×3=3)

आसीत् कस्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः। स च विभवक्षयात् देशान्तरं गन्तुमिच्छन् व्यचिन्तयत् –

यत्र देशेऽथवा स्थाने भोगा भुक्ताः स्ववीर्यतः।
तस्मिन् विभवहीनो या वसेत् स पुरुषाधमः।।

तस्य च गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुला आसीत्। तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः।

प्रश्नाः –

(क) कस्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम कः आसीत्?

(ख) सः विभवक्षयात् कुत्र गन्तुमिच्छन् व्यचिन्तयत्?

(ग) तस्य च गृहे लौह घटिता पूर्वपुरुषोपार्जिता का आसीत्?

**अथवा**

अतएव अस्माभिः प्रकृतिः रक्षणीया। तेन च पर्यावरणं रक्षितं भविष्यति। प्राचीनकाले लोकमङ्गलाशंसिन ऋषयो वने निवसन्ति स्म। यतो हि वने सुरक्षितं पर्यावरण – मुपलभ्यते स्म। तत्र विविधा विहगाः कल – कूजनैः श्रोत्ररसायनं ददति।

सरितो गिरिनिर्झराश्च अमृतस्वादु निर्मलं जलं प्रयच्छन्ति। वृक्षा लताश्च फलानि पुष्पाणि इन्धनकाष्ठानि च बाहुल्येन समुपहरन्ति।

प्रश्नाः –

(क) प्राचीनकाले ऋषयः कुत्र निवसन्ति स्म?

(ख) सरितो गिरिनिर्झराश्च कीदृशं जलं प्रयच्छति?

(ग) वृक्षा लताश्च कानि बाहुल्येन समुपहरन्ति? (1×3=3)

प्र.19 अधोलिखितं पद्यांशं पठित्वा प्रश्नानामुत्तराणि संस्कृतभाषायां लिखत –

निनादय नवीनामये वाणि! वीणाम्
मृदु गाय गीतिं ललित – नीति – लीनाम्।
मधुर – मञ्जरी – पिञ्जरी – भूत – मालाः
वसन्ते लसन्तीह सरसा रसालाः
कलापाः ललित – कोकिला – काकलीनाम्।।

प्रश्नाः –

(क) अये वाणि! कां निनादय?

(ख) ललितनीतिलीनां किं मृदुं गाय?

(ग) कदा रसालाः लसन्ति?

**अथवा**

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी।
न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि।।

प्रश्नाः –

(क) कीदृशो अहम्?

(ख) युवा कः?

(ग) त्वम् कीदृशः? (1×3=3)

प्र.20 अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत –

(ततः प्रविशति तपस्यारतः तपोदत्तः)

तपोदत्तः – अहमस्मि तपोदत्तः। बाल्ये पितृचरणैः क्लेश्यमानोऽपि विद्यां नाऽधीतवानस्मि। तस्मात् सर्वैः कुटुम्बिभिः मित्रैः ज्ञातिजनैश्च गर्हितोऽभवम्। (ऊर्ध्वं निःश्वस्य)
हा विधे! किम् इदं मया कृतम्? कीदृशी दुर्बुद्धि आसीत् तदा। एतदपि न चिन्तितं यत् –

परिधानैरलङ्कारैर्भूषितोऽपि न शोभते।
नरो निर्मणिभोगीव सभायां यदि वा गृहे।।

(किञ्चिद् विमृश्य)

भवतु, किम् एतेन? दिवसे मार्गभ्रान्तः सन्ध्यां यावद् यदि गृह मुपैति तदपि वरम्! नाऽसौ भ्रान्तो मन्यते। अतोऽहम् इदानीं तपश्चर्यया विद्यामवाप्तुं प्रवृत्तोऽस्मि।

प्रश्नाः –

(क) अहं कः अस्मि?

(ख) कदा पितृचरणैः क्लेश्यमानोऽपि विद्यां नाऽधीतवानस्मि?

(ग) सर्वैः कुटुम्बिभिः मित्रैः ज्ञातिजनैश्च कथम् अभवम्?

**अथवा**

चन्दनः – अस्तु। गच्छ। स खीभिः सह धर्मयात्रया आनन्दिता च भव। अहं सर्वमपि परिपाल – यिष्यामि। शिवास्ते सन्तु पन्थानः।

चन्दनः – (मल्लिका तु धर्मयात्रायै गता) अस्तु। दुग्धदोहनं कृत्वा ततः स्वप्रातराशस्य प्रबन्धं करिष्यामि। (स्त्रीवेशं धृत्वा, दुग्धपात्रहस्तः नन्दिन्याः समीपं गच्छति)

उमा – मातुलानि! मातुलानि!

चन्दनः – (उमे! अहं तु मातुलः) तव (मातुलानि तु गङ्गास्नानार्थं काशीं गता अस्ति) कथय! किं ते प्रियं करवाणि?

प्रश्नाः –

(क) का धर्मयात्रायै गता?

(ख) उमायाः मातुलः कः अस्ति?

(ग) उमायाः मातुलानी गङ्गास्नानार्थं कुत्र गता आसीत्?

21 निम्नलिखितं अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (1×4=4)

डॉ. ए.पी.जे. अब्दुल–कलाम–महोदयस्य जन्म तमिलनाडु–प्रदेशस्य रामेश्वरं नाम्नि नगरे मुस्लिम–परिवारे अभवत्। अस्य पितुः नाम जैनुलाब्दीनः मातुः च नाम श्रीमती आशियम्मा आसीत्। बाल्यकाले डॉ. कलामस्य प्रारम्भिकी शिक्षा रामेश्वर–नगरे एव अभवत्। छात्र–जीवनादेव विज्ञानविषयस्य अध्ययने विशेषरुचिः आसीत्। अस्य महोदस्य त्रिशूल – ब्रह्मोस – पृथ्वी – नाग – आकाश – अग्नि इत्यादिनां प्रक्षेपास्त्राणां निर्माणे महती भूमिका आसीत्। यस्मात् कारणात् भारतदेशः विज्ञान सम्पन्नं राष्ट्रम् अजायत्।

प्रश्नाः –

(क) डॉ. कलाम महोदयस्य जन्म कुत्र अभवत्?

(ख) अब्दुलकलामस्य पितुः नाम किम् आसीत्?

(ग) विज्ञानशक्तिसम्पन्नः कः राष्ट्रम् अजायत्?

(घ) डॉ. कलाम महोदयस्य जन्म कस्मिन् परिवारे अभवत्?

प्र.22 स्वस्य प्राचार्यस्य कृते अवकाशार्थं प्रार्थनापत्रं लिखत। (4)

**अथवा**

स्वमित्रं प्रति एकं शुभकामनापत्रं लिखत।

प्र.23 अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृतभाषायां निबन्धं लिखत – (4)

(क) परोपकारः

(ख) उद्यानम्

(ग) संस्कृतभाषायाः महत्त्वम्

(घ) अनुशासनम्

---